**स्फाति** स्त्री स्फाय-भावे क्तिन् यलोप । वृद्धौ अमरः ।

**स्फाय** वृद्धौ भ्वा० आ० अक० सेट् । स्फायते अस्फायि-अस्फायिष्ट । निष्ठायामनिट् यलोपे ईत् स्फीतः ।

**स्फार** पु० स्फाय-रक् । १स्वर्णबुद्बुदे २विपुले ३विकटे मेदि० ४प्रचुरे च त्रि० संक्षिप्त० ।

**स्फारण** न० स्फुर-णिच्-स्फारादेशः ल्युट् । विकाशने ।

**स्फाल** पु० स्फल-घञ् । स्फूर्त्तौ । [कट्फले शब्दच० ।

**स्फिग्घातन** पु० स्फिचं घातयति हन-स्वार्थे णिच-ल्यु ।

**स्फिच्** स्त्री स्फाय-डिच् ।१कटिप्रोथे अमरः उपचारात् तद्स्थे वातजे २रोगभेदे च । [यति ते अपिस्फिटत् त ।

**स्फिट** हतौ हिंसे अनादरे च चु० उभ० सक० सेट् । स्फेट-

**स्फिर** त्रि० स्फाय किरच् । १प्रचुरे अमरः २वृद्धे च ।

**स्फीत** त्रि० स्फाय-क्त स्फीभावः । १वृद्धे २समृद्धे च ।

**स्फुट** भेदे चु०उभ०सक०सेट् । स्फोटयति ते अपुस्फुटत् त ।

**स्फुट** विकाशे भ्वा०प० अक० सेट् । स्फोटति इरित् अस्फुटत् अस्फोटीत् । [पुस्फोट ।

**स्फुट** विकाशे तु० कुटा० प०अक०सेट् । स्फुटति अस्फुटीत्

**स्फुट** विदलने भ्वा० आत्म० अक० सेट् । स्फोटते अस्फोटिष्ट । [ते अपुस्फुण्टत् त ।

**स्फुट** परीहासे चुरा०उभ०अक०सेट् इदित् । स्फुण्टयति

**स्फुट** हिंसे चु० उभ० सक०सेट् प्रायेणाङ्पूर्वः । आस्फोटयति ते आपुस्फुटत् त । [अपुस्फुटत् त ।

**स्फुट** विकाशे अद० चु० उभ० सक० सेट् । स्फुटयति ते

**स्फुट** त्रि०स्फुट-क ।१विकशिते २व्यक्ते मेदि० ३भिन्ने ४शुक्ले च अजयः ।५ज्योतिषोक्तेषु मेषादिराशिषु अंशविशेषस्थितेषु सूर्य्यादिग्रहेषु पु०तेषां वृत्तकर्त्तृकक्षादिषु गतौ स्त्री । ७तत्प्रमेयाया द्योतने न०। ८सर्पफणायां स्त्री राजनिघ० । ग्रहाणां स्फुटताकरणप्रयोजनं सि०शि० उक्तं यथा “यात्राविवाहोत्सवजातकादौ खेटैः स्फुटैरेव फलस्फुटत्वम् । स्यात् प्रोच्यते तेन नभश्चराणां स्फुटक्रिया दृग्गणितैक्यकृद् या” इत्युपक्रमे स्पष्टाधिकारे प्रपञ्चितं ग्रहाणां मृदूच्चादिकमुक्तोक्तम् “मृदूच्चेन हीनो ग्रहो मन्दकेन्द्रं चलोच्चं ग्रहोनं भवेच्छीघ्रकेन्द्रम् । तुलाजादिकेन्द्रे फलं स्वर्णमेवं मृदु ज्ञेयमस्माद्विलोमं च शीघ्रम् । त्रिभिर्भैः पदं तानि चत्वारि चक्रे क्रमात् स्यादयुक्युग्मसंज्ञा च तेषाम् । अयुग्मे पदे यातमेष्यं तु युग्मे भुजो बाहुहीनं त्रिभं कोटिरुक्ता” इत्युक्त्वा भुजकोटिफलादिकमुक्त्वा । “स्यात् संस्कृतो मध्यफलेन मध्यो मन्दस्फुटः स्याच्चलकेन्द्रमुक्तम् । विधाय शैघ्रेण फलेन चैवं खेटः स्फुटः स्यादसकृत्फलाभ्याम् । दलीकृताभ्यां प्रथमं फलाभ्यां ततोऽखिलाभ्यामसकृत् कुजस्तु । स्फुटौ रवीन्दू मृदुनैव वेद्यौ शीघ्राख्यतुङ्गस्य तयोरभावात्” सि० शि० । आदौ ग्रहस्य मन्दफलमानीय तेन संस्कृतोऽसौ मन्दस्फुटः स्यात् । तं शीघ्रोच्चाद्विशोध्य शीघ्रकेन्द्रं कृत्वा ततः शीघ्रफलम् । तेन संस्कृतो मन्दस्फुटो ग्रहः स्यात् । तस्मात् स्फुटान्मध्योच्चं विशोध्य मन्दमानीय तेन गणितागतो मध्यसंस्कृतो मन्दस्फुटः स्यात् । तेन पुनश्चलकेन्द्रं ततश्चलफलं तेन मन्दस्फुटसंस्कृतः स्फुटः स्यात् एवमसकृत् यावदविशेषः । तत्तु दलीकृताभ्यां प्रथमं फलाभ्यामित्यादिना कुजस्य विशेष उक्तस्तत्रोपपत्तिरेव वासना” प्रमिता० । ग्रहाणां तत्रोक्तः स्पष्टगत्यानयनप्रकारस्तु खगोलशब्दे २४२२ पृ० दृश्यः ।

**स्फुटन** न०स्फुट-ल्युट् । १विकशने अमरः २विदलीभावे च ।

**स्फुटबन्धनी** स्त्री स्फुटं बन्धनं यस्याः गौरा० ङीष् । कपोतपद्याम् रत्नमा० ।

**स्फुटित** त्रि०स्फुट-क्त । १विकशिते हेमच० १भिन्ने “दग्धे वा स्फुटितेऽथ वा” पुराणम् । ३व्यक्तीकृते ४परिहासिते च

**स्फुटि(टी)** स्त्री स्फुट इन् वा ङीप् । १पादस्फोटरोगे (फोड़ा) २कर्कटीफले च (फुट) शब्दर० । [ट्टत् त ।

**स्फुट्ट** अनादरे चु० उ० सक० सेट् । स्फुट्टयति ते अपुस्फु-

**स्फुड़** वरणे तु० कु० पर० सक० सेट् । स्फुडति अस्फुडीत् पुस्फोड़ । [अस्फुण्डिष्ट ।

**स्फुड** विकाशे भ्वा० आत्म० अक० सेट् इदित् । स्फुण्डते

**स्फुड** परिहासे चु० उ० सक० सेट् इदित् । स्फुण्डयति ते अपुस्फुण्डत् त । [शब्दच० ।

**स्फुत्कार** पु० स्फुदित्यव्यक्तं शब्दं करोति कृ-अच् । अग्नौ

**स्फुर** स्फूर्त्तौ तु० कुटा० प० अक० सेट् । स्फुरति अस्फुरीत् पुस्फोर । “चारु पुस्फोर बाहुः” भट्टिः । णिचि-स्फारयति । [२स्फुरणे अमरः ।

**स्फुर** पु० स्फुर-क । फलके हेमच० । १भावे घञ् ।

**स्फुरण** न० स्फुर-ल्युट् । ईषत्स्पन्दने अमरः । युच् । तत्रैव स्त्री । अङ्गभेदे स्फुरणफलमुक्तं यथा “मूर्ध्नोऽधनाङ्गस्फुरितस्य सम्यक् प्रत्येकमव्यक्तफलप्रभावम् । सर्वत्र यत्रावगते स्वदेहाद्युत्पद्यते कर्मविपाकसंवित् । मूर्ध्नि स्फुरत्याशु पृथिव्याप्तिः स्थानप्रवृद्धिश्च